श्रीमते रामानुजाय नमः

**श्री भगवद्रामानुजमुनिभिरनुगृहीतम्**

# ॥ श्रीवैकुण्ठ गद्यम्॥

यामुनार्य सुधाम्भोधिमवगाह्य यथामति।
आदाय भक्तियोगाख्यम् * रत्नं संदर्शयाम्यहम्॥

* स्वाधीन त्रिविध चेतनाचेतन स्वरूप स्थिति प्रवृत्ति भेदम् * क्लेश कर्माद्यशेष धोषा संस्पृष्टम् * स्वाभाविक अनवधिकातिशय ज्ञान बलैश्वर्य * वीर्य शक्ति तेजः प्रभृति * असङ्ख्येय कल्याण गुणगणौघ महार्णवम् * परमपुरुषम् भगवन्तम् नारायणम् * स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य * ऐकान्तिक आत्यन्तिक तत्पादाम्बुजद्वय * परिचर्यैक मनोरथः * तत्प्राप्त्ये च तत्पादाम्बुजद्वय प्रपत्तेः * अन्यन्न मे कल्पकोटि सहस्रेणापि * साधनमस्तीति मन्वानः * तस्यैव भगवतो नारायणस्य * अखिलसत्त्व दयैक सागरस्य * अनालोचित गुणगण अखण्डजनानुकूल अमर्याद शीलवतः * स्वाभाविक अनवधिकातिशय गुणवत्तया * देवतिर्यङ्मनुष्यादि अखिलजन हृदय आनन्दनस्य * आश्रित वात्सल्यैक जलधेः * भक्तजन संश्लेषैक भोगस्य * नित्य ज्ञान क्रियैश्वर्यादि * भोग सामग्री समृद्धस्य * महाविभूतेः * श्रीमत् चरणारविन्दयुगळम् * अनन्यात्म सञ्जीवनेन * तद्गत सर्वभावेन * शरणं अनुव्रजेत्॥ १

ततश्च प्रत्यःअम् * आत्मोज्जीवनायैवं अनुस्मरेत्॥ २

चतुर्दश भुवनात्मकमण्डम् * दशगुणितोत्तरं च

श्रीमते रामानुजाय नमः

आवरण सप्तकम् * समस्तं कार्य कारण जातमतीत्य वर्तमाने *
परमव्योम शब्दाभिधेये * ब्रह्मादीनां वाङ्मनसागोचरे *
श्रीमति वैकुण्ठे दिव्य लोके * सनकविधि शिवादिभि अपि *
अचिन्त्य स्वाभावैश्वर्यैः नित्य सिद्धैः * अनन्तैः
भगवदानुकूल्यैक भोगैः * दिव्य पुरुषैः महात्मभिः
आपूरिते * तेषामपीयत् परिमाणं इयदैश्वर्यम् *
ईदृशस्वभावं इति * परिच्छेत्तुमयोग्ये * दिव्यावरण
शतसहस्र आवृते * दिव्य कल्पकतरूप शोभिते * दिव्योद्यान
शतसहस्रकोटिभिरावृते * अतिप्रमाणे दिव्यायतने *
कस्मिंश्चिद्विचित्र दिव्य रत्नमय दिव्यास्थान मण्डपे * दिव्य
रत्नस्तम्भ शतसहस्रकोटिभिरुपशोभिते * दिव्य नानारत्न
कृत स्थल विचित्रिते * दिव्यालङ्कार अलङ्कृते * परितः
पतितैः पतमानैः * पादपस्थैश्च नानागन्ध वर्णैः *
दिव्य पुष्पैः शोभमानैः * दिव्य पुष्पवनैः उपशोभिते *
सङ्कीर्ण पारिजातादि * कल्पद्रुम उपशोभितैः * असङ्कीर्णैश्च
कैश्चित् * अन्तःस्थ पुष्प रत्नादि निर्मित * दिव्य लीला मण्डप *
शतसहस्र उपशोभितैः * सर्वदा अनुभूयमानैरपि *
अपूर्ववत् आश्चर्यमावहद्भिः * क्रीडाशैल शतसहस्रैः
अलङ्कृतैः * कैश्चित् नारायण दिव्य लीलाऽसाधारणैः *
कैश्चित् पद्मावनालया दिव्य लीलाऽसद्धारणैः *
साधारणैश्च कैश्चित् * छुकशारिका मयूर कोकिलादिभिः *
कोमलकूजितैराकुलैः * दिव्योद्यान शतसहस्रकोटिभिरावृते *
मणिमुक्ता प्रवाळ कृतसोपानैः * दिव्यामल अमृत रसोदकैः
दिव्याण्ड जवरैः * अतिरमणीय दर्शनैः * अतिमनोहर मधुर
स्वरैराकुलैः * अन्तःस्थ मुक्तामय दिव्य क्रीडास्थान
उपशोभितैः * दिव्य सौगन्धिक वापी शतसहस्रैः * दिव्य
राज हंसावली विराजितैरावृते * निरस्तातिशय आनन्दैकरसतया

च * आनन्त्याच्च प्रविष्टानुन्मादयद्भिः * क्रीडोद्देशैर्विराजिते *
तत्र तत्र कृत दिव्य पुष्प पर्यङ्क उपशोभिते * नानापुष्प
आसव आस्वाद मत्त भृङ्गावलीभिः * उद्गीयमान दिव्य गान्धर्वेण
आपूरिते * चन्दनागरु कर्पूर दिव्य पुष्प अवगाहि
मन्दानिलासेव्यमाने * मध्ये दिव्य पुष्प सञ्चय विचित्रिते *
महति दिव्य योगपर्यङ्के अनन्त भोगिनि * श्रीमद्वैकुण्ठ
ऐश्वर्यादि दिव्य लोकम् * आत्म कान्त्या विश्वमाप्याययन्त्या * शेष
शेषाशनादि सर्व परिजनम् * भगवतः तत्तदवस्थोचित *
परिचर्यायां आज्ञापयन्त्या * शीलरूप गुण विलासाधिभिः *
आत्मानुरूपया श्रीया सहासीनम् * प्रत्यग्र उन्मीलित सरसिज
सदृश नयनयुगळम् * स्वच्छ नीलजीमूतसङ्काशम् *
अत्युज्ज्वलपीत वाससम् * स्वया प्रभया अतिनिर्मलया अतिशीतलया
अतिकोमलया स्वच्छया माणिक्याभया कृत्स्नं जगध्भासयन्तम् *
अचिन्त्य दिव्याद्भुत नित्य यौवन स्वभाव लावण्यमय अमृत
सागरम् * अतिसौकुमार्यादीषत् प्रस्विन्नवत् * अलक्ष्यमाण
ललाटफलक दिव्य अलकावली विराजितम् * प्रबुद्ध मुग्धाम्बुज
चारुलोचनम् * सविभ्रमभ्रूलतम् * उज्ज्वलाधरम् * शुचिस्मितम् *
कोमलगण्डम् * उन्नसम् * उदग्र पीनांस विलंबि कुण्डल अलकावली
बन्धुर कम्बुकन्धरम् * प्रियावतंस उत्पल
कर्णभूषणश्लथालकाबन्ध विमर्दशम्सिभिः * चतुर्भिः
आजानुविलम्बिभिर्भुजैः विराजितम् * अतिकोमल दिव्य रेखालङ्कृत
आताम्र करतलम् * दिव्य अङ्गुळीयक विराजितम् * अतिकोमल दिव्य
नखावली विराजितम् * अनुरक्ताङ्गुलीभिः अलन्कृतम् * तत्क्षण
उन्मीलित पुण्डरीक सदृश चरण युगळम् * अतिमनोहर किरीट
मकुट चूडावतंस * मकर कुण्डल ग्रैवेयक * हार केयूर
कटक * श्रीवत्स कौस्तुभ मुक्तादाम * उदरबन्धन पीताम्बर
काञ्चीगुण नूपुरादिभिः * अत्यन्त सुख स्पर्शैः दिव्य गन्धैः *

भूषणैः भूषितम् * श्रीमत्या वैजयन्त्या वनमालया विराजितम् *
शङ्ख चक्र गदासि शार्ङ्गादि दिव्यायुधैः * सेव्यमानम् *
स्वसङ्कल्पमात्र अवक्लृप्त * जगज्जन्म स्थिति ध्वंसादिके *
श्रीमति विष्वक्सेने न्यस्त * समस्त आत्मैश्वर्यम् * वैनतेयादिभिः *
स्वभावतो निरस्त समस्त सांसारिक स्वभावैः * भगवत्
परिचर्याकरण योग्यैः * भगवत् परिचर्यैक भोगैः *
नित्यसिद्धैः अनन्तैः * यथायोगं सेव्यमानम् * आत्मभोगेन
अननुसंहित परादिकालम् * दिव्यामल कोमल अवलोकनेन *
विश्वमाह्लादयन्तम् * ईषदुन्मीलित मुखाम्बुज उदर विनिर्गतेन *
दिव्यानानारविन्द शोभाजनकेन * दिव्य गाम्भीर्य औदार्य * सौन्दर्य
माधुर्यादि अनवधिक * गुणगण विभूषितेन * अतिमनोहर दिव्य
भावगर्भेण * दिव्य लीलालाप अमृतेन * अखिलजन हृदयान्तराणि
आपूरयन्तम् * भगवन्तं नारायणम् * ध्यानयोगेन धृष्ट्वा * ततो
भगवतो नित्यस्वाम्यम् * आत्मनो नित्यदास्यं च * यथावस्थितं
अनुसन्धाय * "कदाऽहं भगवन्तं नारायणम् * मम कुलनाथ *
मम कुलदैवत * मम कुलधन * मम भोग्य * मम मातर *
मम पितर * मम सर्व * साक्षात् करवाणि चक्षुषा; * कदाऽहं
भगवत् पादाम्बुज द्वयम् * शिरसा धारयिष्यामि; * कदाऽहं भगवत्
पादाम्बुज द्वय * परिचर्याकरण योग्यः * तदेकभोगः * तत्पादौ
परिचरिष्यामि; * कदाऽहं भगवत् पादाम्बुज द्वय परिचर्याशया *
निरस्त समस्तेतर भोगाशः * अपगत समस्त सांसारिक स्वभावः *
तत्पादाम्बुज द्वयं प्रवेक्ष्यामि; * कदाऽहं भगवत् पादाम्बुज
द्वय परिचर्याकरण योग्यः तदेक भोगः * तत्पादौ
परिचरिष्यामि; * कदा मं भगवान् स्वकीयया * अतिशीतलया धृशा
अवलोक्य * स्निग्ध गम्भीर मधुरया गिरा * परिचर्यायाम् आज्ञापयिष्यति"
इति * भगवत् परिचर्यायाम् आशां वर्धयित्वा * तयैव आशया *
तत्प्रसाद उपबृंहितया * भगवन्तं उपेत्य * दूरादेव भगवन्तम् *

श्रीमते रामानुजाय नमः

शेषभोगे श्रिया सहासीनम् * वैनतेयादिभि सेव्यमानम् * "समस्त
परिवाराय * श्रीमते नारायणाय नमः" इति * प्रणम्य उत्थाय उत्थाय *
पुनः पुनः प्रणम्य * अत्यन्त साध्व सविनया वनतो भूत्वा * भगवत्
पारिषद् गणनायकैः * द्वारपालैः * कृपया स्नेह गर्भया
धृशाऽवलोकितः * सम्यक् अभिवन्दितैः * स्तैरेव अनुमतः *
भगवन्तं उपेत्य * श्रीमता मूलमन्त्रेण * "भगवन्! * माम्
ऐकान्तिक आत्यन्तिक * परिचर्या करणाय * परिगृह्णीष्व" इति
याचमानः * प्रणम्य * आत्मानं भगवते निवेदयेत्॥ ३

ततो भगवता स्वयमेव * आत्म सञ्जीवनेन * अमर्याद शीलवता * अति
प्रेमान्वितेन * अवलोकनेन अवलोक्य * सर्वदेश सर्वकाल
सर्वावस्थोचित * अत्यन्त शेषभावाय * स्वीकृतः अनुज्ञातश्च *
अत्यन्त साध्व सविनयावनतः * किङ्कुर्वाणः कृताञ्जलिपुटः *
भगवन्तं उपासीत॥ ४

ततश्च अनुभूयमान भावविशेषः * निरतिशय प्रीत्या अन्यत्
किञ्चित् कर्तुं ध्रष्टुं स्मर्तुं अशक्तः * पुनरपि शेषभावमेव
याचमानः * भगवन्तमेव * अविच्छिन्न स्रोतोरूपेण * अवलोकनेन *
अवलोकयन्नासीत॥ ५

* ततो भगवता स्वयमेव * आत्मसञ्जीवनेन * अवलोकनेन अवलोक्य *
सस्मितमाहूय * समस्तक्लेशापहम् * निरतिशय सुखावहम् *
आत्मीयम् * श्रीमत्पादारविन्दयुगळम् * शिरसि कृतं ध्यात्वा * अमृत
सागर अन्तर्निमग्नः * सर्वावयवः सुखमासीत॥ ६

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नः *
योऽसौ पुरा समजनिष्ट जगद्धितार्थम्।

श्रीमते रामानुजाय नमः

प्राच्यं प्रकाशयतु नः परमं रहस्यम् *
संवाद एष शरणागति मन्त्रसारः ॥ ७

**॥ इति श्रीवैकुण्ठ गद्यं समाप्तम् ॥**